# .. দক্ষিণামুৰিতৰৰণমালাস্তোত্ৰম ..

ॐমিত্যেতদ্যস্য বুধৈরনাম গৃহীতং
যদ্ভাসেদং ভাতি সমস্তং ৰিযদাদি .
যস্যাজঞাতঃ স্ৰস্ৰপদস্থা ৰিধিমুখ্যা-
স্তং প্রত্যঞ্চং দক্ষিণৰক্ত্ৰং কলযামি .. ১..
নম্রাঙ্গাণাং ভক্তিমতাং যঃ পুরুষারথা-
ন্দত্ৰা ক্ষিপ্রং হন্তি চ তত্সরৰৰিপত্তীঃ .
পাদাম্ভোজাধস্তনিতাপস্মৃতিমীশং
তং প্রত্যঞ্চং দক্ষিণৰক্ত্ৰং কলযামি .. ২..
মোহধৰস্ত্যৈ ৰৈণিকৰৈযাসিকিমুখ্যাঃ
সংৰিন্মুদ্রাপুস্তকৰীণাক্ষগুণান্যম .
হস্তাম্ভোজৈরিবভ্রতমারাধিতৰন্ত-
স্তং প্রত্যঞ্চং দক্ষিণৰক্ত্ৰং কলযামি .. ৩..
ভদ্রারূঢং ভদ্রদমারাধযিতৃণাং
ভক্তিশ্রদ্ধাপুরৰকমীশং প্রণমন্তি .
আদিত্যা যং ৰাঞ্ছিতসিদ্ধ্যৈ করুণাব্ধিং
তং প্রত্যঞ্চং দক্ষিণৰক্ত্ৰং কলযামি .. ৪..
গরভান্তঃস্থাঃ প্রাণিন এতে ভৰপাশ-
চ্ছেদে দক্ষং নিশ্চিতৰন্তঃ শরণং যম .
আরাধ্যাঙ্ঘ্রিপ্রস্ফুরদম্ভোরুহযুগ্মং
তং প্রত্যঞ্চং দক্ষিণৰক্ত্ৰং কলযামি .. ৫..
ৰক্ত্ৰং ধন্যাঃ সংসৃতিৰারেধরতিমাত্রা-
দ্ভীতাঃ সন্তঃ পূরণশশাঙ্কদ্যুতি যস্য .
সেৰন্তেধ্যাসীনমনন্তং ৰটমুলং
তং প্রত্যঞ্চং দক্ষিণৰক্ত্ৰং কলযামি .. ৬..
তেজঃস্তোমৈরঙ্গদসংঘট্টিতভাস্ৰ-

ন্মাণিক্যৌঘৈরৱভাসিতৱিশ্ৱো রুচিরৈর্য্যঃ .
তেজোমূর্তিং খানিলতেজঃপ্রমুখাব্ধিং
তং প্রত্যঞ্চং দক্ষিণৱক্ত্রং কলযামি .. ৭..
দধ্যাজ্যাদিদ্রৱ্যককর্মাণ্যখিলানি
ত্যক্ত্ৱা কাঙক্ষা কর্মফলেষ্ৱত্র করোতি .
যজ্জিজ্ঞাসাং রূপফলার্থী ক্ষিতিদেৱ-
স্তং প্রত্যঞ্চং দক্ষিণৱক্ত্রং কলযামি .. ৮..
ক্ষিপ্রং লোকে যং ভজমানঃ পৃথুপুণ্যঃ
প্রধ্ৱস্তাধিঃ প্রোজ্ঝিতসংসৃত্যখিলার্তিঃ .
প্রত্যগ্ভূতং ব্রহ্ম পরং সন্রমতে য-
স্তং প্রত্যঞ্চং দক্ষিণৱক্ত্রং কলযামি .. ৯..
ণানেত্যেৱং যন্মনুমধ্যস্থিতৱর্ণা-
ন্ভক্তাঃ কালে ৱর্ণগৃহীত্যৈ প্রজপন্তঃ .
মোদন্তে সংপ্রাপ্তসমস্তশ্রুতিতন্ত্রা-
স্তং প্রত্যঞ্চং দক্ষিণৱক্ত্রং কলযামি .. ১০..
মূর্তিশ্ছাযানির্জিতমন্দাকিনিকুন্দ-
প্রালেযাম্ভোরাশিসুধাভূতিসুরেভা .
যস্যাভ্রাভা হাসৱিধৌ দক্ষশিরোধি-
স্তং প্রত্যঞ্চং দক্ষিণৱক্ত্রং কলযামি .. ১১..
তপ্তস্ৱর্ণচ্ছাযজটাজূটকটাহ-
প্রোদ্যদ্ৱীচীৱল্লিৱিরাজত্সুরসিন্ধুম্ .
নিত্যং সূক্ষ্মং নিত্যনিরস্তাখিলদোষং
তং প্রত্যঞ্চং দক্ষিণৱক্ত্রং কলযামি .. ১২..
যেন জ্ঞাতেনৈৱ সমস্তং ৱিদিতং স্যা-
দ্যস্মাদন্যদ্ৱস্তু জগত্যাং শশশৃঙ্গম্ .
যং প্রাপ্তানাং নাস্তি পরং প্রাপ্যমনাদিং

তং প্রত্যঞ্চং দক্ষিণৰক্ত্রং কলযামি .. ১৩..
মত্তো মারো যস্য ললাটাক্ষিভৰাগ্নি-
স্ফুরজত্কীলপ্রোষিতভস্মীকৃতদেহঃ .
তদ্ভস্মাসীদ্যস্য সুজাতঃ পটৰাস-
স্তং প্রত্যঞ্চং দক্ষিণৰক্ত্রং কলযামি .. ১৪..
হ্যম্ভোরাশৌ সংসৃতিরূপে লুঠতাং ত-
ত্পারং গন্তুং যত্পদভক্তিরদৃঢনৌকা .
সরৰারাধ্যং সরৰগমানন্দপযোনিধিং
তং প্রত্যঞ্চং দক্ষিণৰক্ত্রং কলযামি .. ১৫..
মেধাৰী স্যাদিন্দুৰতংসং ধৃতৰীণং
করপূরাভং পুস্তকহস্তং কমলাক্ষম .
চিত্তে ধ্যাযন্যস্য ৰপুদ্রাঙিনমিষারধং
তং প্রত্যঞ্চং দক্ষিণৰক্ত্রং কলযামি .. ১৬..
ধাম্নাং ধাম প্রৌঢরুচীনাং পরমং য-
ত্সূর্যাদীনাং যস্য স হেতুরজগদাদেঃ .
এতাৰান্যো যস্য ন সরেৰশ্ৰরমীড্যং
তং প্রত্যঞ্চং দক্ষিণৰক্ত্রং কলযামি .. ১৭..
প্রত্যাহারপ্রাণনিরোধাদিসমরৈথ-
রভক্তৈরদান্তৈঃ সংযতচিত্তৈর্যতমানৈঃ .
স্ৰাত্মত্ৰেন জঞাযত এৰ ত্ৰরযা য-
স্তং প্রত্যঞ্চং দক্ষিণৰক্ত্রং কলযামি .. ১৮..
জঞাংশীভূতান্প্রাণিন এতান্ফলদাতা
চিত্তান্তঃস্থঃ প্রেরযতি স্ৰে সকলেপি .
কৃত্যে দেৰঃ প্রাক্তনকরমানুসরঃ সং-
স্তং প্রত্যঞ্চং দক্ষিণৰক্ত্রং কলযামি .. ১৯..
প্রজঞামাত্রং প্রাপিতসংবিন্নিজভক্তং

প্রাণাক্ষাদেঃ প্রেরযিতারং প্রণৰারথম .
প্রাহুঃ প্রাজ্ঞা ৰিদিতানুশ্রৰতত্তৰা-
স্তং প্রত্যঞ্চং দক্ষিণৰক্ত্রং কলযামি .. ২০..
যস্যাংজ্ঞানাদেৰ নৃণাং সংসৃতিবোধো
যস্য জ্ঞানাদেৰ ৰিমোক্ষো ভৰতীতি .
স্পষ্টং ব্রুতে ৰেদশিরো দেশিকমাদ্যং
তং প্রত্যঞ্চং দক্ষিণৰক্ত্রং কলযামি .. ২১..
ছন্নেৰিদ্যারূপপটৈনৈৰ চ ৰিশ্ৰং
যত্রাধ্যস্তং জীৰপরেশত্ৰমপীদম .
ভানোরভানুষ্ৰম্বুৰদস্তাখিলভেদং
তং প্রত্যঞ্চং দক্ষিণৰক্ত্রং কলযামি .. ২২..
স্ৰাপস্ৰপ্নৌ জাগ্রদৰস্থাপি ন যত্র
প্রাণশ্চেতঃ সরৰগতো যঃ সকলাত্মা .
কূটস্থো যঃ কেৰলসচ্চিত্সুখরূপ-
স্তং প্রত্যঞ্চং দক্ষিণৰক্ত্রং কলযামি .. ২৩..
হা হেত্যেৰং ৰিস্মযমীযুরমুনিমুখ্যা
জ্ঞাতে যস্মিন্সৰাত্মতযানাত্মৰিমোহঃ .
প্রত্যগ্ভূতে ব্রহমণি যাতঃ কথমিত্থং
তং প্রত্যঞ্চং দক্ষিণৰক্ত্রং কলযামি .. ২৪..
যৈষা রম্যৈরমত্তমযূরাভিধৰৃত্তৈ-
রাদৌ ক্লৃপ্তা যন্মনুৰরৈণরমুনিভঙ্গী .
তামেৰৈতাং দক্ষিণৰক্ত্রঃ কৃপযাসা-
ৰূরীকুর্যাদ্দেশিকসম্রাট পরমাত্মা .. ২৫..
ইতি শ্রীমত্পরমহংসপরিৰরজকাচার্যস্য
শ্রিগোৰিন্দভগৰত্পূজ্যপাদশিষ্যস্য
শ্রীমচ্ছংকরভগৰত্পাদ কৃতৌ

শ্ৰীদক্ষিণামুৰিতৰৰণমালাস্তোত্ৰং সংপূৰণম ..

Encoded and proofread by Sridhar Seshagiri seshagir@egr.msu.ed